अस्मिन् प्रश्नपत्रे 35 प्रश्नाः सन्ति। 7 मुद्रितपुटानि च सन्ति ।

Sl. No.

Roll No. / अनुक्रमांङ्क: | | | | | | | | | | | | |

Code No. / गुढ संख्या **58/SS/A**

Set / स्तबकः **A**

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (347)

**Day and Date of Examination**
**(परीक्षादिनं: दिनाङ्कश्च)** ____________________

**Signature of Invigilators**
**(निरीक्षकयोः हस्ताक्षरम्)** 1. ____________________
2. ____________________

**सामान्य निर्देशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

3. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।

7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (347)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs.)]** **[पूर्णांङ्का : (Full Marks) 100**

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे **[A]** भागे **10, [B]** भागे **10, [C]** भागे **10, [D] 5,** इति आहत्य **35** प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

(iii) समे प्रश्ना अनिवार्याः ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **[10 × 1 = 10]**

**1.** के बहुपुरूषवादम् अङ्गीकुर्वन्ति ?

(क) नैयायिकाः

(ख) वैशेषिकाः

(ग) वेदान्तिनः

(घ) सांख्याः

**2.** एकादशको गणः कस्मात् तत्त्वात् उत्पद्यते ?

(क) प्रकृतेः

(ख) महत्तत्त्वात्

(ग) तमः प्रधानाद् अहङ्कारात्

(घ) सत्त्वप्रधानात् अहङ्कारात्

3. बौद्धमतानुसारेण एतेषु किं न प्रमाणम्।

(क) अनुमानम्

(ख) प्रत्यक्षम्

(ग) शब्दः

(घ) एषु किमपि न।

4. एतेषु कः लक्षणदोषः नास्ति?

(क) व्याप्तिः

(ख) अव्याप्तिः

(ग) अतिव्याप्तिः

(घ) असम्भवः

5. वेदान्तमते प्रमा कति?

(क) पञ्च

(ख) षट्

(ग) अष्ट

(घ) चतस्रः

6. वेदान्तमते अभावः कतिविधः?

(क) त्रिविधः

(ख) चतुर्विधः

(ग) द्विविधः

(घ) षड्विधः

7. अद्वैतमते किदृशी परमेश्वरस्य सृष्टिप्रवृत्तिः ?

(क) सप्रयोजना

(ख) लीलारूपा

(ग) भोगरूपा

(घ) मोक्षरूपा

8. कस्यामुपनिषदि आकाशप्रमुखा सृष्टिः प्रतिपाद्यते ?

(क) तैत्तिरीयोपनिषदि

(ख) कठोपनिषदि

(ग) बृहदारण्यकोपनिषदि

(घ) छान्दोग्योपनिषदि

9. जीवात्मनः कति अवस्थाः भवन्ति ?

(क) द्वे

(ख) तिस्रः

(ग) चतस्रः

(घ) पञ्च

10. विषयेभ्यो बाह्योन्द्रियाणां निग्रहः किमुच्यते।

(क) शमः

(ख) दमः

(ग) उपरतिः

(घ) वैराग्यम्

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। [10 × 2 = 20]

11. त्रिविध दुःखं किम्? सांख्यकारिकाकारमते सांख्यशास्त्रस्य प्रयोजनं किम्? [1 + 1]

12. असतः सत् जायते–इति केषां मतम्? सतः असत् जायते इति केषां मतम्? [1 + 1]

13. करणस्य लक्षणं किम्? वृत्त्यात्मकं ज्ञानं कस्य धर्मः? [1 + 1]

14. किं नाम निर्विकल्पं ज्ञानम्? उदाहरणम् एकं लिखत। [1 + 1]

15. अद्वैतवेदान्तमते आरोपितस्य वस्तुनः किं स्वरूपम्? ख्यादिपस्य कोऽर्थः? [1 + 1]

16. तटस्थलक्षणस्य लक्षणं किम्? तटस्थलक्षणस्य उदाहरणमेकं दीयताम्। [1 + 1]

17. अज्ञानं भावरूपम् इत्यस्य तात्पर्यं किम्? अविद्या इत्यत्र नञः कोऽर्थः? [1 + 1]

18. अध्यारोपः नाम कः? एकः दृष्टान्तः प्रदीयताम्। [1 + 1]

19. समाधेः अन्तरायाः के? प्रत्याहारः नाम किम्? [1 + 1]

20. अद्वैतवेदान्तमते सत्ता कतिविधा? का च ताः? अद्वैतमते जगतः कीदृशी सत्ता? [1 + 1]

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त। **[10 × 4 = 40]**

**21.** वेदान्तमते शाब्दबोधे सहकारिकारणानां संक्षेपेण परिचयः दीयताम्।

**22.** अन्तःकरणस्य सावयवत्वं प्रतिपादयत।

**23.** सूक्ष्मशरीरविषये वैशद्येन लिखत।

**24.** ब्रह्मणः स्वरूपलक्षणविषये लघुटिप्पणीमेकां लिखत।

**25.** मायायाः आश्रयत्वविषयत्वविचारं समासेन समुपस्थापयत।

**26.** अध्यासलक्षणं संक्षेपेण विचारयत।

**27.** अद्वैतवेदान्तदर्शने परमार्थतः सृष्टिरेव नास्ति – वाक्यमिमं विचारयत।

**28.** सविकल्पकसमाधिं वर्णयत।

**29.** अद्वैतवेदान्तानुसारेण विदेहमुक्तिं समासेन वर्णयत।

**30.** शिवज्ञानेन जीवसेवा – इति विषयं विवेकानन्ददर्शनम् अनुसृत्य लिख्यताम्।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः। **[5 × 6 = 30]**

**31.** सांख्यदर्शनानुसारेण पञ्चविंशतितत्त्वानां कार्यकारणभेदेन चतुर्धा यः विभागः प्रदर्शितः तेषां संक्षेपेण आलोचनं क्रियताम्।

**32.** प्रमालक्षणविषये लघुटिप्पणीमेकां लिखत।

**33.** पञ्चख्यातिषु यथेच्छं ख्यातित्रयं समासेन आलोच्यताम्।

**34.** वेदान्ते कः अधिकारी भवति इति विषयं विस्तरेण वर्णयत।

**35.** षड्विधानां तात्पर्यनिर्णायकलिङ्गानां सोदाहरणं परिचयः प्रदीयताम्।

✈ ✈ ✈